अपि च।
"शुक्लश्चाथ हकारोऽंशः प्राणः सान्तः शिवो वियत्।
नकुली नकुलीशश्च हंसः शून्यश्च हाकिनी।
अनन्तो नकुली जीवः परमात्मा ललाटजः॥"
इति बीजवर्णाभिधानम्।
अपि च।
"हकारो नकुलीशोऽपि हंसः प्राणोऽङ्कुशः प्रिये।
महेशो नकुली चैव वराहो गगनं रविः।
लिङ्गं शून्यो महाशून्यः प्राणश्च परमेश्वरि!॥"
इति श्रीरुद्रयामले ८ पटले मन्त्राभिधानम्॥
ह, व्य. (हन हिंसागत्योः+अन्येभ्योऽपीति डः।) पादपूरणम्। इत्यमरः। ३। ४। ५॥ (यथा, रामायणे। १। १। ५८।
"पम्पातीरे हनुमता सङ्गतो वानरेण ह॥")
सम्बोधनम्। विनिग्रहः। नियोगः। क्षेपः। कुत्सा। इति मेदिनीशब्दरत्नावल्यौ॥
हं, [म्] व्य, रुषोक्तिः। अनुनयः। इति मेदिनी॥
हः, पुं, शिवः। जलम्। शून्यम्। धारणम्। मङ्गलम्। गगनम्। नकुलीशः। रक्तम्। स्वर्गः। इति मेदिनी॥ पापहरणम्। चन्द्रः। इति शब्दरत्नावली॥ सकोपवारणः। शुष्कः। इत्येकाक्षरकोषः॥
हंसः, पुं. (हन्ति सुन्दरं गच्छतीति। हन हिंसागत्योः+"वृतॄवदिहनीति।" उणा० ३। ६२। इति सः।) पक्षिविशेषः। हाँस इति भाषा। तत्पर्य्यायः। श्वेतगरुत् २ चक्राङ्गः ३ मानसौकाः ४। इत्यमरः। २।५।२३॥ कलकण्ठः ५ सितच्छदः ६। इति जटाधरः॥ सितपक्षः ७ सरःकाकः ८ पुरुदंशकः ९। इति शब्दरत्नावली॥ धवलपक्षः १० मानसालयः ११। इति राजनिर्घण्टः॥ अस्य मांसगुणाः। वातहरत्वम्। वृष्यत्वम्। स्वर्य्यत्वम्। मांसबलप्रदत्वञ्च। इति राजवल्लभः॥*॥
अपि च।
"स्निग्धं हिमं गुरु वृष्यं मांसं जलपक्षिणान्तु वातघ्नम्।
तेष्वपि च हंसमांसं वृष्यतमं तिमिरहरञ्च॥"
इति राजनिर्घण्टः॥
अपि च।
"हंससारसकादम्बबककारण्डवक्रौञ्चसरारिकाः।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः।
प्लवन्ते सलिले यस्मात् एते तस्मात् प्लवाः स्मृताः॥"
काचाक्षः कपर्दिकाक्षो बृहद्बकः। क्रौञ्चः शरहिहङ्गः स्यात्। टेक इति लोके। शरारिका सिन्धु इति लोके।
"स्थूला कठोरा हस्ता च यस्यायस्यूर्ध्वंवस्थिता।
गुटिकाचक्षुसदृशी ज्ञेया नन्दीमुखीति सा॥"
कादम्बः करावा इति लोके। वला बगुली इति लोके।

"प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः॥"
इति भावप्रकाशः॥*॥
(यथा च।
"गुरूष्णस्निग्धमधुराः स्वरवर्णबलप्रदाः।
बृंहणाः शुक्रलास्तोक्ता हंसा मारुतनाशनाः॥"
इति चरके सूत्रस्थाने २७ अध्याये॥)
अस्या डिम्बगुणाः हंसबीजशब्दे द्रष्टव्याः॥*॥
तस्य शकुनं यथा,—
"काष्ठासु सर्व्वास्वपि दर्शनेन
हंसस्य शब्देन तु सर्व्वसिद्धिः।
नामानि हंसस्य शृणोति यस्तु
प्रयान्ति नाशं दुरितानि तस्य॥
चौरैः समं दर्शनमाद्यशब्दे
निधिर्द्वितीयेऽथ भयं तृतीये।
युद्धं चतुर्थे नृपतिप्रमादः
स्यात् पञ्चमे हंसरवे नराणाम्॥"
इति वसन्तराजशाकुने ८ वर्गः॥
निर्लोभनृपः। विष्णुः। (यथा महाभारते। १२। ४३। ७।
"शुचिश्रवा हृषीकेशो घृतार्च्चिर्हंस उच्यसे॥")
सूर्य्यः। (यथा, महाभारते। ३। ३। ६१।
"त्वं हंसः सविता भानुरंशुमाली वृषाकपिः॥")
परमात्मा। मत्सरः। योगिभेदः। मन्त्रभेदः। शरीरस्थवायुविशेषः। तुरङ्गमप्रभेदः। इति मेदिनी॥ (गोविशेषः। यथा, बृहत्संहितायाम्। ६१। १७।
"सितवर्णः पिङ्गाक्ष-
स्ताम्रविषाणेक्षणो महावक्त्रः।
हंसो नाम शुभफलो
यूथस्य विवर्द्धनः प्रोक्तः॥")
गुरुः। पर्व्वतः। इति शब्दरत्नावली॥ शिवः। इत्यनेकार्थकोषः॥ अमतः स्थितः। श्रेष्ठः। इति हेमचन्द्रः॥ विशुद्धः। इत्यजयः॥*॥
अथ हंसमन्त्रविवरणम्। अस्याजपागायत्रीमन्त्रस्य शिरसि हंसऋषये नमः। मुखे अव्यक्तगायत्रीच्छन्दसे नमः। हृदि परमहंसदेवतायै नमः। लिङ्गे हं बीजाय नमः। आधारे सः शक्तये नमः। परमात्मप्रीतये उच्छ्वासनिश्वासाभ्यां षट्शताधिकैकविंशतिसहस्रजपेन पूर्व्वभूतेभ्यो निवेदयामि। मूलाधारमण्डपे स्वर्णवर्णे चतुर्द्दलपद्मे वादिसान्तचतुर्व्वर्णान्विते गायत्रीसहिताय गणनाथाय षट्शतसंख्यजपमहर्निशं समर्पयामि नमः। स्वाधिष्ठानमण्डपे अनेकविद्युन्निभे वादिलान्तषड्वर्णान्विते षड्दलपद्मे सावित्रीसहिताय ब्रह्मणे अजपामन्त्रषट्सहस्रं निवेदयामि नमः। मणिपूरमण्डपे नीलोत्पलमेघनिभे डादिफान्तदशवर्णान्विते दशदलपद्मे लक्ष्मीसहिताय विष्णवे षट्सहस्रजपं समर्पयामि नमः। अनाहतमण्डपे तरुणरविनिभे द्वादशवर्णयुते द्वादशदलपद्मे गौरीसहिताय शिवाय अजपाषट्सहस्रजपं समर्पयामि नमः। विशुद्धमण्डपे षोड़शदलकर्णिकामध्ये जीवात्मने अकारादि-अःकारान्ते अजपासहस्रसंख्यजपं निवेदयामि नमः। आज्ञामण्डपे शीचन्द्रप्रभे द्विदलपद्मे ह-क्ष-वर्णान्विते मायासहितगुरुमूर्त्तये एकसहस्रजपं निवेदयामि नमः। ब्रह्मरन्ध्रमण्डपे नानावर्णोज्ज्वले सहस्रपद्मस्थिताय परमात्मने अकारादिक्षकारान्तसहिताय एकसहस्रजपं निवेदयामि नमः। सहस्रशब्दोऽसंख्यपर इति बोध्यम्। उक्तञ्च पद्मं कोटिसमन्वितमिति। इति जपं समर्प्य अष्टोत्तरशतसंख्यमजपाजपं कुर्य्यात्। अकारादिक्षकारान्ता वर्णा हंस इति शिवशक्तिबिन्दुना ब्रह्म अ इति विसर्गरूपबिन्दूभ्यां हरिहरयोरभेदः। सोऽहमित्याभेदभावनया ब्रह्मरूपतां स्वं स्वं परिभाव्य उक्तः। षट्शताधिकैकविंशतिसहस्रजपेन परदेवतारूप श्रीपरमेश्वरः प्रीयतामित्येकवारं सङ्कल्प्य ध्यायेत्॥*॥ हंसस्य ध्यानं यथा,—
"आराधयामि मणिसन्निभमात्मलिङ्गं
मायापुरीहृदयपङ्कजसन्निविष्टम्।
श्रद्धानदीविमलचित्तजलावगाहं
नित्यं समाधिकुसुमैरपुनर्भवाय॥"*॥
प्रसङ्गात्मपरहस्यं लिख्यते। पञ्चाशद्वर्णसंपुटत्वेनानुलोम्यप्रातिलोम्येन ब्रह्मरूपं मेव चकारं परिकल्प्य तया सह जपं कुर्य्यादिति दोषलेशैर्न बाध्यते। एतेन विश्वमेव हंसमाहकयोरैकाकारेण कालात्मना लोके चिदात्म उच्यते। अजपाविधानं विना श्रीविद्यादिसकलविद्याया अनधिकारी भवेत्। तदुक्तम्।
"हंसज्ञानविमुग्धेन कृतमप्यकृतं भवेत्।" इति।
"अजपाधारणं देवि! कथयामि तवानघे!।
यस्य विज्ञानमात्रेण परं ब्रह्मैव देशिकः॥
हसः पदं परेशानि प्रत्यहं प्रजपेन्नरः।
मोहबन्धं न जानाति मोक्षस्तस्य न विद्यते॥
श्रीगुरोः कृपया देवि! ज्ञायते जप्यते यदा।
उच्छ्वासनिश्वासतया तदा बन्धक्षयो भवेत्॥
उच्छ्वासे चैव निश्वासे हंस इत्यक्षरद्वयम्।
तस्मात् प्राणस्तु हंसात्मा आत्माकारेण संस्थितः।
नाभेरुच्छ्वासनिश्वासात् हृदयाग्रेर्व्यवस्थितः॥"
इति राघवभट्टधृतदक्षिणामूर्त्तिसंहितायां ७ पटलः॥*॥ अहोरात्रमध्येऽजपाजपसंख्या यथा,—
"षष्टिश्वासैर्भवेत् प्राणः षट्प्राणा नाड़िका मता।
षष्टिनाड्या अहोरात्रं जपसंख्याक्रमो मतः॥
एकविंशतिसाहस्रं षट्शताधिकमीश्वरि।
जपते प्रत्यहं प्राणी सान्द्रानन्दमयीं पराम्।
उत्पत्तिश्च जपारम्भो मृत्युस्तस्य निवेदनम्॥"
इति तत्रैव ७ पटलः॥*॥
अजपानामकारणमपि तत्रैव।
"विना जपेन देवेशि! जपो भवति मन्त्रिणः।
अजपेयं ततः प्रोक्ता भवपाशनिकृन्तनी॥
एवं जपं महेशानि प्रत्यहं विनिवेदयेत्।